Volume – 3 | Issue – I | Jan-Feb 2026 | ISSN: 3049-0278 (Online)

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

# वीणावासवदत्तनाटकस्य विषयचमत्कारित्वे कौटिल्यार्थशास्त्रस्य प्रभावः

(Vīṇāvāsavadattanāṭakasya viṣayacamatkāritve Kauṭilyārthaśāstrasya prbhāvāḥ.)

**Juhina Khatun**[1]

***Abstract***

*In the world of poetry the creation of a poet is superior to the creation of Brahma. Poets creats poetry with his own genius. This poetry is mainly of two types -visible (dṛśya) and audible (śrāvya). Among them, the main subject of visible poetry of acting or abhinaya. The four types of abhinaya- āngika, vāchika, āhārya, sāttvika. Generally, visible poetry is called rūpaka, drama (nāṭaka), or nāṭya. That is the nāṭaka or rūpaka where actors actresses perform acting by assuming the rolls of heros and heroines like Udayana and Vāsavadattā.Because different types of acting are seen in different rūpakas. This rūpaka is of ten types. The ancient writer Bharata Muni has accepted ten types of rūpaka in his Nāṭyaśāstra. Biswanātha has also accepted ten types in his Sāhityadarpaṇa. Besides these, eighteen types of uparūpakas are also mentioned.*

*Among such ten types of rūpakas and eighteen uparūpakas of Sanskrit dramatic literature, the first type, nāṭaka, is the most unique. Similarly, among the nāṭakas composed in Sanskrit literature, there is a visible poetry called Vīṇāvāsavadatta, composed by an unknown author, which is also one of the least known and unfamiliar visible poetries.The drama Vīṇāvāsavadatta is full of various emotions and has a profound meaning. At the beginning of the, nāṭaka there is a brief introduction, but nothing is said about its author . However, Vīṇāvāsavadatta has various unique features that remind one of Bhāsa's nāṭakas .The manuscript of this nāṭaka was found in the city of Trivandrum, written in Malayalam script on palm leaves. Dr. C. Kunhan Raja published four acts of this play in the Journal of Oriental Research, Madras, in 1927. To draw attention to the facts of this nāṭaka, editor K.V. Sharma published his views. After publication, this play attracted the attention of scholars, especially in solving the Bhāsa problem.Later, Professor Kuppuswami Sastri published this nāṭaka in book form. Although in the book "History of Sanskrit Literature" edited by Dhirendranath Bandyopadhyay, the author of this is nāṭaka mentioned as Shudraka, this fact is not accepted by all researchers.Although the nāṭakas named Vīṇāvāsavadattam, which is discussed in this article.*

***Key Words:*** *Shudraka, Vinavasavadattam, Arthashastram, arthanubandha, Svabarahyoh kalahe, Ubhayabetana*

AIJITR - Volume - 3, Issue - I, Jan-Feb 2026

Copyright © 2026 by author (s) and (AIJITR). This is an Open Access article distributed under the terms of the Creative Commons Attribution License (CC BY 4.0) (https://creativecommons.org/licenses/by/4.0)

## भूमिका

**"अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।"**[i] काव्यजगति कविसृष्टिः ब्रह्मसृष्टेः उत्कृष्टतरः भवति। स स्वीयप्रतिभावलेन काव्यं सृजति। इदं काव्यं मुख्यतया द्विविधं दृश्यं श्रव्यं च - **"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विविधा मतम्।"**[ii] तन्मध्ये दृश्यकाव्यस्य मुख्यविषयः भवति

[1] *Research scholar, Dept of Sanskrit, Vidyasagar University, Paschim Medinipur. W.B, Email id- juhinakhatun14916@gmail.com*

***DOI Link (Crossref) Prefix:*** *https://doi.org/10.63431/AIJITR/3.I.2026.37-44*
***AIJITR, Volume 3, Issue –I, January-February, 2026, PP.37-44***
***Received on 19th February, 2026 & Accepted on 20th February, 2026, Published: 23rd February, 2026***

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

अभिनयः। अभिनययोग्यकाव्यं खलु दृश्यकाव्यम्। दृश्यकाव्ये आङ्गिकवाचिकाहार्य्यसात्त्विकरूपाभिनयेषु रामयुधिष्ठिरादीनाम् अवस्थानुकरणं भवति। तस्मात् धनञ्जयेन दशरूपके उक्तं – **"अवस्थानुकृतिर्नाट्यम्।"**[iii] पुनरपि उक्तं – **"रूपकं तत्समारोपात् दशधैव समाश्रयम्।"**[iv] साधारणतया दृश्यकाव्यम् इत्युक्ते रूपकं, रूपं, नाटकं, नाट्यं वा बोध्यन्ते। आचार्य विश्वनाथेनापि उक्तं – **"तद् रूपारोपात्तु रूपकम्।"**[v] अर्थात् रूपके नाटके वा नटीनटादयः उदयन-वासवदत्तादिनायकनायिकारूपं विधृत्य अभिनयं कुर्वन्ति। यतो हि विभिन्नेषु रूपकेषु अभिनयप्रकारः दृश्यते। इदं रूपकं दशविधम्। प्राचीनालंकारिकेण भरताचार्येण तस्य नाट्यशास्त्रे रूपकस्य दशविधत्वं स्वीकृतम् –

**"नाटकं सप्रकरणमङ्को व्यायोग एव च।**
**भाणः समवकारश्च वीथी प्रहसनं डिमः।।**
**ईहामृगश्च विज्ञेया दशेमे नाट्यलक्षणे।**
**एतेषां लक्षणमहं व्याख्यास्याम्यनुपूर्वशः।।"**[vi]

विश्वनाथेनापि साहित्यदर्पणे अनुरूपदशविधः स्वीकृतः। एतद्व्यतिरिक्तस्य अष्टादशप्रकारस्य उपरूपकस्य भेदोऽपि उल्लिख्यते। तद् यथा –

**"नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।**
**प्रस्थानोल्लाप्यकाव्यनि प्रेङ्खणं रासकं तथा।।**
**संलापकं श्रीगदितं शिल्पकञ्च विलासिका।**
**दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च।**
**अष्टादश प्राहुरुपरूपकाणि मनीषिणः।**
**विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्।।"**[vii]

संस्कृतनाट्यसाहित्यस्य एतादृशेषु दशरूपकेषु अष्टादश उपरूपकेषु च आद्यः नाटकप्रकारः सर्वापेक्षया अपूर्वत्वं विधत्ते। तथैव संस्कृतसाहित्ये विरचितेषु नाटकेषु अज्ञातलेखकेन विरचितं एकं दृश्यकाव्यं वीणावासवदत्तमिति दृश्यकाव्यम् अप्रसिद्धत्वात् परिचिते अभावत्वात् अपि अन्यतमम्। यद्यपि धीरेन्द्रनाथवन्द्योपाध्यायसम्पादितस्य 'संस्कृत साहित्येर इतिहास' इत्यस्मिन् ग्रन्थे अस्य नाटकस्य रचयिता शूद्रकः इति उल्लिख्यते। परन्तु तथ्यमिदं सर्व्वैः गवेषकैः न स्वीकृयते। यद्वा भवतु वीणावासवदत्तमिति नाम्ना किमपि नाटकं तु उपलब्धम्। यद्विषये चर्चा प्रस्तुतेऽस्मिन् प्रबन्धे क्रियते।

**नाटकप्रकाशनस्येतिवृत्तम्**

वीणावासवदत्त नाटकमिदं विविधभावेन तात्पर्यपूर्णमस्ति। वीणावासवदत्तनाटकस्य प्रारम्भे संक्षिप्ता स्थापना, किञ्च तस्य लिपिकरस्य विषयेऽपि किञ्चिद् न प्रोक्तम्। तथापि वीणावासवदत्तनाटकस्य विविधानि वैशिष्ट्यानि सन्ति यानि भासस्य नाटकानि स्मारयन्ति। नाटकस्यास्य मातृकारूपं त्रिवान्द्राम् इति नगरे तालपत्रमध्ये मालयालमिति भाषाक्षरेण उपलब्धम्। माद्राजप्रदेशे ओरियेन्टालरिसार्चजार्नाल् इति पत्रिकायां १९२७ खीष्टाब्दे प्रयातः डाः सि कुनहानमहाराजः अस्य नाटकस्य अङ्कचतुष्टयमात्रं प्रकाशितवान्। परवर्तिनामङ्कानां कियदंशोऽपि तेन प्रकाशितः। अस्य नाटकस्य तथ्यं प्रति विद्वद्दृष्टिं समाकर्षणाय सम्पादकः के.भि.शर्मा स्वमतं प्रकाशितवान्। तन्मते भासनाटकानां यानि वैशिष्ट्यानि सर्वेषां दृग्गोचरी भवन्ति तत्तद्वैशिष्ट्यानि अस्मिन् नाटकेऽपि विराजन्ते। अतः भाससमस्यायाः पुनर्विवेचनाय वीणावासवदत्तमिति नाटकं तेन प्रकाशितम्। प्रकाशनादनन्तरं भाससमस्यायां समाधानकल्पे नाटकमिदं विशेषतः पण्डितानां दृष्टिमाकृष्टम्। एतदर्थम् अध्यापकः कुप्पुस्वामीशास्त्रीमहोदयेन परवर्तिकाले नाटकमिदं पुस्तकस्य आकारेण प्रकाशितम् –


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

**It was with this purpose that the late Mm. Prof. S. Kuppuswami sastri later issued it in book-form, as no.2 in the Madras Oriental Series 1931.[viii]**

**नाटके चर्चितविषयः**

वीणावासवदत्तनाटकमिदम् अष्टमाङ्केषु विन्यासः अस्ति। नाटकस्य प्रथमाङ्के उज्जयिन्याः राजा महासेनः प्रद्योतः तस्य कन्यायाः वासवदत्तायाः परिणयाय अचिन्तयत्। स वासवदत्तां कृते उपयुक्तपात्रस्य अन्वेषणार्थं महादेवस्य समीपे प्रार्थयति। महादेवः स्वप्ने गुणरत्नरूपपुष्पेण ग्रथित मालया एकं श्लोकं प्रद्योताय निदिर्शान्। यदि एवम्गुणयुक्तपात्रस्य हस्ते वासवदत्तां यच्छति तर्हि वासवदत्ता सुखयशोभोगिनी भविष्यति-

**यो विक्रान्तः कुलीनो नयविनयपरः सर्वविद्याकलाज्ञो**
**दाताऽऽव्याधिः कृतास्त्रो व्यसनविमुखधीर्निर्विकारो विपत्सु।**
**मृत्योर्निर्भीश्चिरायुर्मृदुरतिसुभगो दीप्तिमान् प्राज्ञमन्त्री**
**कन्या नीताप्यकामं भवति सुखयशोभागिनी तादृशेन।।**[ix]

इदं श्रुत्वा वसुवर्मा वदति महादेवः एकमात्रं वत्सराजं मत्वा एवम्गुणान् अवदत्। प्रद्योतः तु अतीव अहंकारी राजा। तत् सः एतादृशगुणान्वितम् उदयनम् अनायासेनैव परित्यज्य उक्तवान् – **“न गणयति नरेश्वरान् क्षितौ मृगपतिपोत इव द्विपेश्वरान्।”**[x] स वदति उदयनः यद्यपि सर्वगुणसम्पन्नो राजा तथापि अहं तुभ्यं कन्यासम्प्रदानं न करिष्यामि। यतः सर्वे वदन्ति उदयनः यद्यपि शङ्करानुमतो वरः तथापि स चिन्तयित्वा वक्ति उदयनः स्वयं यदि तस्य कन्यया सह परिणयं करोति तदा स आनन्दितो भविष्यति। भरतरोहकः वदति वत्सराजोऽपि अतीव दाम्भिकः राजा। अतःपरं प्रद्योतस्य मन्त्रिणः कथयन्ति यत् चिन्तामास्तु अस्माभिः राजा उदयनो बद्धो भविष्यति। उदयनस्य वन्धनं कथमपि ते कर्तुं परिकल्पयन्ति। तदा भरतरोहकः आह उदयनस्य एकः अभिशापः अस्ति यत् स गजेन क्षतिग्रस्तो भविष्यति। द्वितीयाङ्के शालङ्कायनः सैनिकैः सह उदयनं वन्धाति। तृतीयाङ्के यौगन्धरायणः उदयनस्य रक्षार्थम् एकांकल्पनां करोति। स उन्मत्तवेषेण उज्जयिनीं प्रविशति। चतुर्थाङ्के यौगन्धरायणः परेद्यु एकं नलागिरिनामकं मत्तगजं प्रद्योतस्य राजधान्यां प्रेषयितुमिच्छति। तेन प्रजाः उद्विग्नाः भविष्यन्ति। अहं हि च जानामि उदयनः इमं मत्तगजं स्ववशीभूतं करिष्यति तदा उदयनः वन्धनात् मुक्तः भविष्यति। अतः हंसकः यौगन्धरायणश्च परिकल्पितवृत्तान्तस्य समापनाय मन्दिरं निकषा अपेक्षेते। पूर्वकल्पनानुसारम् उदयनः गीतेन मत्तगजं वशीभूतं करोति। अतःपरं वत्सराजः भरतरोहकस्य हस्ते वीणां ददाति। वीणागीतं श्रुत्वा वासवदत्ता चिन्तयति यत् – **“अस्यैवैषानुरुपा वीणा।”**[xi] सपरिवारो राजा वातायनस्य समीपे तिष्ठति। काञ्चुकीयः भरतरोहकात् वीणां प्राप्तुं प्रासादं प्रविशति। ततः काञ्चुकीयात् वासवदत्ता वीणां गृह्णाति। वारणाधिरुढोवत्सराजः वातायनस्य समीपे विशति। तं दृष्ट्वा प्रद्योतः विनयं प्रदर्शयति। **“महान् खलु ममोपकारः कृतः। अतीव तव परिश्रमः भवति अतः अद्य तावत् त्वं विश्रामं लभस्व।”**[xii] एवं संलापे क्रियमाणे एकः अपरं पश्यति। प्रथमदर्शने एव उदयनः वासवदत्ता च एकः अपरं प्रति आकृष्टहृदयौ अभवताम्। पञ्चमाङ्के वासवदत्ता उदयनाय उत्कण्ठिता दुःखिता च अभवत्। काञ्चनमाला, चेटी, वासवदत्ताश्च उदयनसम्वन्धे उद्याने संलापं कुर्वतः। चेटी वदति एका सन्न्यासीनि तया परिचिता। तस्याः नाम साङ्कृत्यायनी। सा नैपथ्यात् ईश्वरप्रभावेन सर्वं वृत्तान्तं ज्ञात्वा वदितुं शक्नोति। साङ्कृत्यायनी नैपथ्यात् चेट्याः काञ्चनमालायाश्च सर्वं वृत्तान्तं शृणोति। साङ्कृत्यायनी उदयनस्य वासवदत्तायाश्च प्रणयस्य कथां चिन्तयित्वा प्रविशति। सा जानाति – उदयनः पूर्वं वासवदत्तां यमुनायाः जलात् अरक्षत्। किन्तु इदानीं परस्परं न अवगच्छतः। अन्यच्च वासवदत्तायाः पितरौ तां दृष्ट्वा चिन्ताग्रस्तौ, यत् तयोः कन्यायाः हृदः विकारः सञ्जातः। तौ स्वकन्यायाः इमाम् अवस्थां पारिव्राजिकासाङ्कृत्यायनै अवदताम्। यतः साङ्कृत्यायनी ईश्वरस्य ध्याने अमज्जत्। सा ईश्वरस्य सहायेन सर्वं ज्ञातुमर्हति। तौ साङ्कृत्यायनीं निकषा प्रासादं प्रविश्य तया सह सर्वं वृत्तान्तं परामृशतः।


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

साङ्कृत्यायनी आह वासवदत्ता गन्धर्वग्रस्ता प्रतिभातीति। अपरपक्षे उदयनः वासवदत्तया विना विक्लवो दृष्टः मनःसन्तापात्। उदयनस्य अस्य मनःसन्तापस्य कारणं भवति वासवदत्ता। साङ्कृत्यायनी वदति यत् अहं शृणोमि **"स खलु चित्ररथो नाम गन्धर्वराजो भगवता तुम्बुरुणा शाप्तो मनुष्येषूत्पन्नो भव इति।"**[xiii] इमां वार्तां श्रुत्वा राजा आत्मगतं संकल्पं करोति उदयनं निकषा वासवदत्तां प्रेषयितुम्। वासवदत्ता मदनसन्तापात् उदयनं त्रातुं शक्नोति। परन्तु राजा प्रद्योतः अपवादात् वासवदत्तां त्रातुम् उदयनं निकषा वीणाशिक्षालाभव्यजेन प्रेषितवान्। नाटकस्य षष्ठाङ्के उदयनः वासवदत्ता च परस्परं प्रति प्रणयासक्तौ भवतः, परन्तु द्वौ न परस्परं वदतः। सप्तमाङ्के साङ्कृत्यायन्याः उत्साहे उदयनः वीणाशिक्षायां रभते। अतःपरं विदूषकः एकं नृत्यानुष्ठानम् अकरोत्। अस्मिन् नृत्यानुष्ठाने साङ्कृत्यायनी उदयनं वासवदत्तां च गमनार्थम् अवदत्। यतः इदम् अनुष्ठानम् एकः अवसरः यत्र प्रेमिकप्रेमिकानां परस्परदर्शनं सम्भबति। वसन्तकः एकां किंबदन्तिरटताम् अकरोत् यत् स नगर्य्यां नर्मदा नाम एकास्वैरिणीं प्रति आसक्तो अभवत्। उदयनः अचिन्तयत् इमां वार्तां श्रुत्वा वासवदत्तायाः हृदयस्य किञ्चित् परिवर्तनं भविष्यति यदि सा मे प्रणयं करोति। अष्टमाङ्के इदं नर्मदावृत्तान्तं श्रुत्वा वासवदत्ता अतीव कष्टम् आप्नोति। अतःपरं साङ्कृत्यायनी वासवदत्ताम् आह- उदयनः यदि इदं जनश्रुतिं न उक्तवान् तदा त्वं उदयनं प्रति अनुरक्ता इति अस्माभिः न अवगतं स्यात्। उदयनोऽपि इमं वृत्तान्तं न ज्ञातुं शक्नुयात्। इदानीं वासवदत्तायाः हृदयं निर्वृत्तम्। अतःपरं वासवदत्ता वीणायाः सङ्गीतेन उदयनं प्रति प्रेमनिवेदनम् अकरोत्। साङ्कृत्यायन्याः सहायेन उदयनस्य वासवदत्तायाः च मेलनो अभवत्। साङ्कृत्यायनी सन्तुष्टः अभवत् यत् वीणावासवदत्तमिति नाटकं सुष्ठुरूपेण अतिशयरूपेण च समाप्तो भवति।

**विषयचमत्कारित्वेऽर्थशास्त्रस्य प्रभावः**

वीणावासवदत्तेऽस्मिन् नाटके 'अर्थानुबन्धः', 'श्ववराहयोः कलहे', 'उभयवेतन' इत्यादयः केचन शब्दाः प्राप्यन्ते येषां प्रयोगः कौटिल्यस्य अर्थशास्त्रे विविधक्षेत्रे दरीदृश्यते। येनानुमीयते अर्थशास्त्रेण सह अस्य नाटकस्य सम्वन्धः आसीत्। येन असौ नाट्यकारः कौटिल्यात् परवर्ती इति निश्चयेन वक्तुमपि शक्यते। वीणावासवदत्तेऽस्मिन् नाटके अर्थशास्त्रस्य विविधप्रभावो यद्यपि अस्ति तथापि अस्मिन् मत्कृते शोधप्रबन्धे केषाञ्चित् पारिभाषिकशब्दानां चर्चा प्रस्तूयते। ते शब्दाः आदौ नामतः उल्लिख्यन्ते। 'एष खल्वनर्थानुबन्धोऽर्थो नाम', 'श्ववराहकलहे', 'उभयवेतन' चेति। एतेषां शब्दानां साधारणार्थः, नाटके विषयचमत्कारित्वे प्रभावः - एतत् सर्वं यथासाध्यं विचार्यते। वस्तुतः पूर्वोक्तशब्दानां गूढार्थबोधः कौटिल्यार्थशास्त्रं विना कथमपि न सम्भवति। नाटकेऽस्मिन् सहसा एतेषां शब्दानां श्रवणे अर्थबोधः, प्रसङ्गसङ्गतिः नैव सम्भवेत् कौटिल्याभावात्।

वीणावासवदत्तनाटकस्य द्वितीयाङ्के प्रद्योतस्य मन्त्रिणः उदयनं वन्दीकर्तुं कञ्चन हस्तिनं चिन्वन्ति। एतस्मिन्नवसरे भरतोराहकोऽपि एकं चारम् अयुङ्क्त यत् उदयनस्य वृत्तिं वेदितुम्। चारोऽपि सर्वं वृत्तान्तं ज्ञात्वा मन्त्रिणे ज्ञापयति। स चारो ज्ञातवान् यत् उदयनः राजधान्याः अतिदूरे एकं नागवनं प्रविष्टो तत्र पदातीनां सहस्रद्वयं तुरगशतं विंशतिपरिमितं नीत्वा प्रविष्टवान्। किन्च सर्वं नीत्वा प्रमोदेन रतिं च कुर्यात्। चारः एतदपि ज्ञापयति यत् तत्र उदयनस्य प्रधानमन्त्री यौगन्धरायणः तथा प्रधानः सैनिकः रुमण्वान् अपि अनुपस्थितौ, तौ कार्यान्तरं व्यापृतौ। अपरः कश्चन चारः उदयनस्य राज्ये नियुक्तः, येन तत्र उदयनराज्यवृत्तान्तः ज्ञातुं शक्यते। यदा उदयनः तन्मन्त्रिणश्च नीलगजस्य सन्धानं कुर्वन्तः सन्ति तदा प्रद्योतस्य चारः उदयनं ज्ञापितवान् इतः द्वियोजनमात्रे यमुनाकच्छे शालवनमेकम् अस्ति। तत्र मालभारिका नाम काचित् अतिमुक्तलता विद्यते। तत् समीपे स हस्ती अभिरमते। अस्याः अतिमुक्तलतायाः पश्चात् शालङ्कायनोऽपि हस्तिनं सैनिकं च नीत्वा प्रच्छन्नः आसीत्। ततःपरं प्रथमचारः द्वितीयचारेण माध्यमेन शालङ्कायनं ज्ञापितवान् यत् अधुना उदयनस्य यथार्थः बन्धनसमयः। यतः विष्णुत्रातः विदूषकश्च किञ्चित् दूरे विश्रामं करोति, किन्च उदयनं नीत्वा पूर्वनिर्धारितस्थाने नीलगजबन्धनाय

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

आगच्छन्नस्ति सः। तत्र उदयनः गत्वा प्रकृत्याः सौन्दर्यं पश्यन् वीणया सह च एकं गीतं गीतवान्। यतः गजबन्धनमेव उदयनस्य मुख्यम् उद्देश्यम् आसीत् ततः स चारस्य पूर्वानुमानं न ज्ञातवान्। पुनः चारः उदयनं वदति अस्याः लतायाः पश्चात् नीलगजम् अस्ति। इदं श्रुत्वा उदयनः यदैव वीणसहयोगेन तत्र प्रविशति। तदैव शालङ्कायनः अनेकसैनिकान् नीत्वा उदयनं बन्धाति। उदयनः शालङ्कायनं पृच्छति कस्त्वम् ? किं ते गोत्रम् ? शालङ्कायनः आहः अहं सूर्यदत्तो नाम्ना शालङ्कायनोऽस्मि गोत्रेण। इदं वचनं श्रुत्वा उदयनः उक्तवान् – **'एष खल्वनर्थानुबन्धोऽर्थो नाम'।**[xiv] इदं वचनम् अर्थशास्त्रसम्वन्धमस्ति। अस्याशयः कौटिल्यं विना न स्पष्टतामावहति। अर्थानवगमने नाटकस्य विषयचमत्कारित्वमपि न संघटते। अस्य अनुच्छेदस्य अर्थो भवति यत् अनर्थेन सह अर्थस्य युक्तो भवति। परन्तु पाठकानां समीपे अयम् अर्थो न अवगम्यते। नाटके उल्लिखितस्य 'एष खल्वनर्थानुबन्धोऽर्थो नाम' इति शब्दस्य उल्लेखो अर्थशास्त्रे अभियास्यात्कर्म नाम नवमाधिकरणे अर्थानर्थसंशययुक्ताः(आपदः) तासामुपायविकल्पजाः नाम सप्तमाध्याये समुपलभ्यते। अर्थशास्त्रे कौटिल्यः उक्तवान् – अर्थः अनर्थः च एतयोः अनुबन्धस्य योगवशतः अयोगवशतश्च षट् प्रकाराः भवितुम् अर्हन्ति। अस्य नाम 'अनुबन्धषड्वर्गः' इति। यथा- **"अर्थोऽर्थानुबन्धः, अर्थोनिरनुबन्धः, अर्थोऽनर्थानुबन्धः, अनर्थोऽर्थानुबन्धः, अनर्थोनिरनुबन्धः, अनर्थोऽनर्थानुबन्धश्च।"**[xv] एतेषां मध्ये 'अनर्थोऽर्थानुबन्धः' इति शब्दः नाटके उल्लिख्यते। अर्थः इति शब्दस्य अर्थ भूमि-हिरण्यादि लाभः, अनर्थः इति शब्दस्य अर्थश्च भूमिहिरण्यादि तथा शरीरादिविनाशः। अनर्थस्य अनुबन्धयुक्तार्थः अर्थात् यदा स्वतः परतो वा तत् एवम् अनर्थेन सह अर्थः युक्तो भवति। अस्मिन् प्रसङ्गे श्रीमूलाटीकायाम् उक्तम् – **"स्वतः योऽर्थो गृह्यते तस्मात् परतो वा गृह्यमानमर्थं निमित्तीकृत्य अन्यतो वा, भयोत्पत्तिः इति अनर्थः एवं प्रकारः अनर्थः।"**[xvi] अर्थात् स्वकीये संगृहीतार्थद्रव्यादिविषये तथा अन्यस्मात् प्राप्तार्थविषये यदि भयकारणं स्यात्तर्हि तत् अनर्थरूपविपद् इति कथ्यते। अस्य अनर्थोऽर्थानुबन्धस्य उदाहरणप्रसङ्गे कौटिल्येन उक्तं – **'शत्रुप्रतिवेशस्यानुग्रहः कोशदण्डाभ्याम् अनर्थोऽर्थानुबन्धः।'**[xvii] अर्थात् यत्र शत्रोः विजिगीषुराज्यस्य, अन्तस्थदुर्वलराज्यस्य वा उच्छेदसाधनो भवति, तत् अनर्थानुबन्धोऽर्थः इति नाम्ना अभिधीयते। अत्र अन्तस्थदुर्बलराज्यस्य उच्छेदसाधनं कृत्वा विजिगीषुराज्यस्य अर्थप्राप्तिर्भवति, किन्च वलवतः शत्रोः च निवृत्तिं न कृत्वा अनर्थम् अर्थात् भूमिहिरण्यादीनां तथा शरीरादीनां विनासो भवति।

वीणावासवदत्तेऽस्मिन् नाटके अर्थशास्त्रानुसारेण अन्तस्थदूर्बलराजा शालङ्कायनः, विजिगीषुराजा प्रद्योतः, वलवान् शत्रुः उदयनः। प्रद्योतः तस्य मन्त्रीणाम् आदेशयति यत् उदयनेन सह तस्य राजकन्यायाः परिणयार्थं तं वध्नाति इति विषयः उदयनेन न ज्ञायते। उदयनः चिन्तयति यत् भरतरोहकः उज्जयिनीसाम्राज्यस्य विस्तारार्थं तस्य मित्रदूर्बलराजानं प्रेरयति। भरतरोहकः विजिगीषुव्याघ्ररूपीराजा, यस्य समीपे उदयनः मृगः इव। अतः भरतरोहकः स्वयं न आगम्य दुर्बलराजानं शालङ्कायनं प्रेरयति। यतः शालङ्कायनस्य उच्छेदेऽपि भरतरोहकस्य क्षतिः न भविष्यति, वरं शालङ्कायनस्य राज्यात् अर्थप्राप्तिर्भविष्यति। पुनः वलवान् शत्रुः उदयनस्य निवृत्तं न कृत्वा तस्य शरीरादीनां विनाशं साधयिष्यति।

पुनः वीणावासवदत्तमिति नाटके द्वितीयाङ्के शालङ्कायनः अनेकसैनिकान् नीत्वा उदयनं बध्नाति। उदयनः शालङ्कायनं पृच्छति कस्त्वम् ? किं ते गोत्रम् ? शालङ्कायनः आहः अहं सूर्यदत्तो नाम्ना शालङ्कायनोऽस्मि गोत्रेण। इदं वचनं श्रुत्वा उदयनः उक्तवान् – **"भो सूर्यदत्त ! तत्र भवान् भरतरोहकस्तावत् त्वद्गुणविभूतिमसहमानो नित्यं जिघांसुश्चण्डाल इव 'श्ववराहकलहे' द्वयोरेकवघाद् आत्मनो वृद्धिमवेक्षमाणः त्वाम् ईदृशेष्वासन्नापायेषु नियुनक्ति। लकुटस्थानीयस्त्वं तस्य संवृत्तः।"**[xviii]

नाटके प्रयुक्तः **'श्ववराहकलहे'** इति शब्दस्य उल्लेखो अर्थशास्त्रे अभियास्यात्कर्म नाम नवमाधिकरणे वलोपादानकालाः सन्नाहगुणाः, प्रतिवलकर्मश्च नाम द्वितीयाध्याये समुपलभ्यते। अत्रापि अर्थशास्त्रस्य प्रभावः नाटके स्पष्टतया


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

सूचितः। अर्थशास्त्रं विना शब्दस्यास्य अर्थप्रकाशः स्पष्टं न भवति, किञ्च, विषयचमत्कारित्वमपि न सिध्यति। अर्थशास्त्रे कौटिल्यः उक्तवान् -

**"वलोपादानकाला षट्। यथा- मौल-भृतक-श्रेणी-मित्रामित्राटवि-वलानां समुद्दानकालाः।"**[xix]

तन्मध्ये अमित्रवलविनियोगस्य कालसम्वन्धे उक्तं - **"प्रभूतं मे शत्रुवलं शत्रुवलेन योधयिष्यामि नगरस्थानम् अटवीं वा, तत्र मे श्ववराहयोः कलहे चण्डालस्थेवान्यतरसिद्धिर्भविष्यति।"**[xx]

अर्थात् कस्यचित् शत्रुवलस्य संख्या अधिकः, ते शत्रोः नगरस्थाने स्थितः। अपरः कश्चन सेनानीभिः सह एतादृशान् शत्रुसैन्यान् आटविकसेन्यान् च युद्धे प्रवृत्तं करिष्यति, एवं कृत्वा द्वयोः पक्षयोर्मध्ये कस्यचित् एकस्य रक्षकैः अस्त्रप्रहारेण अपरपक्षः निहतः भविष्यति। अर्थात् श्वः वराहभक्षकश्च चण्डालः यदि श्ववराहयोर्मध्ये युद्धम् आरभते तर्हि असौ युयुधानद्वयोर्मध्ये एकस्य वधेन चण्डालस्य ईप्सितं सिद्ध्यते।

अर्थात् नाटके उदयनः चिन्तयति यत् शालङ्कायनः भरतरोहकश्च अनुचरः चारश्च शालङ्कायनस्य अनुचरः। शालङ्कायनेन सह उदयनस्य युद्धो अभवत्। अत्र श्वरूपीशालङ्कायनो वराहरूप्युदयनयोर्मध्ये यः कश्चित् यदि क्षतिग्रस्तः भविष्यति, चण्डालरूपीभरतरोहकस्य च ईप्सितं सिद्ध्यते इति उदयनेन मन्यते।

वीणावासवदत्तमिति नाटके द्वितीयाङ्के शालङ्कायनः सैनिकैः सह उदयनं वन्धाति। तृतीयाङ्के यौगन्धरायणः पाञ्चालराजारुणेः कौशाम्वीं रक्षितुं रुमण्वतं प्रयुक्तवान्। ततः सः उदयनस्य रक्षार्थम् एकां परिकल्पनां करोति। सः उन्मत्तवेषेण उज्जयिनीं प्रविशति। चतुर्थाङ्के उदयनस्य विदूषकः वसन्तकः प्रद्योतस्य राजधान्युज्जयिन्यां डिण्डिकवेषेण प्रविशति। यतः उदयनः वद्धः आसीत् तस्मात् तस्य वहूनि कार्याणि कर्तुं वसन्तकस्य अवश्यकर्तव्यम्। स प्रद्योतस्य गृहे डिण्डिकवेषेण हंसकं दृष्ट्वा प्रत्यभिज्ञातवान्। तौ द्वौ मन्दिरं गत्वा उदयनस्य वन्धनविषये आलोचनारतौ अभवताम्। हंसकः यौगन्धरायणेन सह प्रद्योतस्य राज्यं प्रविशताम्। हंसकः विदूषकश्च उदयनस्य राजधानीकौशाम्व्याः विषयेऽपि आलोचनाम् अकुरुताम्। हंसकः विदूषकं वदति - **'उभयवेतन इदानीमार्यः संवृत्तः।'**[xxi] अत्रापि **'उभयवेतन'** इति कश्चन शब्दः यस्यार्थबोधः प्रसङ्गसङ्गत्या अर्थशास्त्रं विहाय न सम्यक् भवति। एतादृश्यस्य शब्दस्य व्याख्यानं तत्र अर्थशास्त्रे प्राप्यते।

पुनः नाटके प्रयुक्तः **'उभयवेतन'** इति शब्दस्य उल्लेखो अर्थशास्त्रे दुर्गलम्भोपायः नाम त्रयोदशाधिकरणे अपसर्पप्रणिधिः नाम तृतीयाध्याये समुपलभ्यते। अर्थशास्त्रे कौटिल्यः उक्तवान् - **"तौ चेन्न भिद्येयातां प्रकाशमेवान्येन्यस्य भूम्या पणेत; ततः परस्परं मित्रव्यञ्जनोभयवेतना वा दूतान् प्रेषयेयुः - अयं ते राजा भूमिं लिप्सते शत्रुसंहितः इति; तयोरन्यतरो जाताशङ्कारोषः पूर्ववच्चेष्टेत।"**[xxii]

अर्थात् मित्ररूपिणः गुप्तचराः उभयवेतनागुप्तचराः वा (अर्थात् ये विजिगीषुराज्ञः वेतनभुक्तगुप्तचराः भूत्वा तस्य अनुमोदने शत्रुराज्ञः वेतनभुक्तगुप्तचराः भवन्ति, स्वराज्ञः स्वराज्ञः स्वार्थे च कार्यं कुर्व्वन्ति ) अर्थात् विजिगीषुराज्ञः शत्रुं शत्रोः मित्रञ्च प्रति उद्दिश्य दूतान् प्रेषयेयुः। तस्य सन्देशो भविष्यति - अयं विजिगीषुराजा तव शत्रुणा सह मिलित्वा तव भूमिं ग्रहीतुम् इच्छुकः अस्ति। ततः तस्य तत् शत्रुमित्रयोर्मध्ये अन्यतरराजा आतङ्कितः क्रुद्धश्च च भूत्वा विजिगीषुराज्ञः आक्रमणं करिष्यति, विजिगीषुराजा च द्वितीयराज्ञा (मित्रराज्ञ ) सह मिलित्वा आक्रमणं कृत्वा नाशं करिष्यति।

अस्मिन् नाटके रुमण्वान् विजिगीषूदयनस्य वेतनभुक्तगुप्तचरः भूत्वा आरुणेऽपि गुप्तचरः अभवत् परन्तु उदयनस्यैव कार्यं करोति। परस्परं उदयनस्य शत्रुः (आरुणिः), शत्रोः मित्रं (द्वितीयराजानं) उद्दिश्य दूतान् प्रेरयति। तत्र सन्देशो भविष्यति यत् उदयनः आरुणेः शत्रुणा सह मिलित्वा भूमिं ग्रहीतुं इच्छुकः अस्ति। ततः शत्रोः आरुणेः तस्य मित्रस्य च उभयोर्मध्ये अन्यतरराजा आतङ्कितः क्रुद्धश्च भूत्वा विजिगीषुराजा उदयनस्य आक्रमणं करिष्यति। ततःपरम् उदयनः द्वितीयराज्ञा ( मित्रेण ) सह मिलित्वा आक्रमणं कृत्वा आरुणेः विनाशं करिष्यति।


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

**उपसंहारः**

वीणावासवदत्तमिति नाटके 'एष खल्वनर्थानुबन्धोऽर्थो नाम', 'श्ववराहकलहे', 'उभयवेतन' इत्यादयः प्रयुक्ताः शब्दाः केवलं पारिभाषिकशब्दाः न, तेषाम् अन्तरार्थाः अपि सन्ति। वस्तुतः एतेषां शब्दानां प्रयोगेन नाट्यकारः विषयचमत्कारित्वं प्रस्तुतेऽस्मिन् नाटके साधितवान्। अर्थशास्त्रसम्वद्धा एतादृशाः शब्दाः नाटकस्य गरिमानं वर्धयन्ति। तेन सह अर्थशास्त्रस्य प्रभावेनापि प्रभावितोऽसौ नाट्यकारः इत्यपि प्रतीयते। किञ्च अर्थशास्त्रं विहाय एतेषां शब्दानां गूढार्थपरिस्करणमपि न सम्भवेदिति। अतः वीणावासवदत्तमिति नाटकं विदुषां समक्षं नितरां समादृतम्। तत्र विषयचमत्कारित्वे अर्थशास्त्रस्य प्रभावोऽपि लक्षणीय इति शम्।

**ग्रन्थपञ्जी**

द्विवेदी, आचार्यशिवप्रसादः, अग्निपुराणम्, दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान,१९३१(द्वितीय संस्करणम्).

विश्वनाथकविराजः, साहित्यदर्पणः, सम्पा. आचार्य लोकमणिदाहालः डा. त्रिलोकीनाथद्विवेदी च, वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१७.

------------,----------, सम्पा. उदयचन्द्रवन्द्योपाध्यायः, कोलकाता, संस्कृत वुक डिपो, २०१३(पुनर्मुद्रणम्).

-----------,----------, सम्पा. विमलाकान्तमुखोपाध्यायः, कोलकाता, संस्कृत पुस्तक भाण्डार, २०१३(द्वितीयसंस्करणम्).

धनञ्जयः, दशरूपकम्, सम्पा. अनिलचन्द्रवसुः, कोलकाता, संस्कृत वुक डिपो , २०१८(पुनर्मुद्रणम्).

भरतः, नाट्यशास्त्रम्, सम्पा. सुरेशचन्द्रवन्द्योपाध्यायः, कोलकाता, नवप्रकाशन, २०१४(षष्ठसंस्करणम्).

-----,--------,सम्पा. ड. सुधाकर मालवीयः, वाराणसी, चौखम्बा प्रेस, वि.सं. २०५४(प्रथमसंस्करणम्).

वन्द्योपाध्यायः, धीरेन्द्रनाथः,संस्कृत साहित्येर इतिहास, कोलकाता, पश्चिमवङ्ग राज्यपुस्तक पर्षद, २०१२(पञ्चममुद्रणम्).

हाजरा, नीरदवरण, संस्कृत साहित्येर इतिहास, कोलकाता, पाण्डुलिपि, २००९(प्रथमसंस्करणम्).

KAUTILYA, ARTHASASTRA OF KAUTILYA, ED. R. SHAMA SASTRI, MYSORE, THE GOVERNMENT BRANCH PRESS,1919.

कौटिल्यः, कौटिलीयम् अर्थशास्त्रम्, सम्पा. श्री वाचस्पति गैरोला, वाराणसी, चौखम्बा सुरभारती प्रकाशन,१९८४(तृतीय संस्करणम्).

कौटिल्यः, कौटिलीयम् अर्थशास्त्रम्, सम्पा. अध्यापकः मानवेन्दुवन्द्योपाध्यायः, कोलकाता, संस्कृत पुस्तक भाण्डार, २०११(द्वितीय संस्करणम्).

vīṇāvāsavadattam, ed. C.Kunhan Raja, Madras,Madras Oriental Series No.2, 1927(Revised Edition).

--------------------, ed. K.V. Sarma, Madras, Kuppuswami Shastri Research Institute, 1962(Revised Edition).

कौटिल्यः, कौटिलीय अर्थशास्त्रम्, सम्पा. राधागोविन्द वसाक, कलकाता, संस्कृत वुक डिपो, २०१४(प्रथम प्रकाशम्).

Volume – 3 | Issue – I | Jan-Feb 2026 | ISSN: 3049-0278 (Online)

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

---

[i] अग्निपुराणम्- ३४०/१० पृष्ठाङ्कः-७३६

[ii] साहित्यदर्पणम्-६/१ पृष्ठाङ्कः-४३३

[iii] दशरूपकम् -१/१ पृष्ठाङ्कः-५३

[iv] दशरूपकम् -१/७ पृष्ठाङ्कः-५३

[v] साहित्यदर्पणम्-६/२ पृष्ठाङ्कः-४३३

[vi] नाट्यशास्त्रम्-१८/२२ पृष्ठाङ्कः-२९५

[vii] साहित्यदर्पणम्-६/५ पृष्ठाङ्कः-२४०

[viii] वीणावासवदत्तम् - (प्राककथनम्) पृष्ठाङ्कः - १

[ix] वीणावासवदत्तम् -१/८ पृष्ठाङ्कः - ६

[x] वीणावासवदत्तम् - १/११ पृष्ठाङ्कः - ८

[xi] वीणावासवदत्तम् ,चतुर्थोऽङ्कः, पृष्ठाङ्कः -७२

[xii] तदेव, पृष्ठाङ्कः - ७७

[xiii] तदेव,पञ्चमोऽङ्कः, पृष्ठाङ्कः - ९२

[xiv] वीणावासवदत्तम् ,द्वितीयोऽङ्कः, पृष्ठाङ्कः-२९

[xv] कौटिलीयम् अर्थशास्त्रम्, ९.७.४, पृष्ठाङ्कः- ४६१

[xvi] तदेव, पृष्ठाङ्कः-४६०

[xvii] तदेव, पृष्ठाङ्कः-४६१

[xviii] वीणावासवदत्तम्, द्वितीयोऽङ्कः, पृष्ठाङ्कः- २९

[xix] कौटिलीयम् अर्थशास्त्रम्, ९.२.१ पृष्ठाङ्कः- ४१२

[xx] तदेव, पृष्ठाङ्कः- ४१५

[xxi] वीणावासवदत्तम्, चतुर्थोऽङ्कः - ५६

[xxii] कौटिलीयम् अर्थशास्त्रम्, १३.३.५, पृष्ठाङ्कः - ५९७


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431